अग्निपुराणे ।
"रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी ।
सप्तम्यामर्द्धरात्राधःकलयापि यदा भवेत् ॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ।
तमेवोपवसेत् कालं तत्र कुर्य्याच्च जागरम् ॥
अविद्धायाञ्च सर्क्षायां जातो देवकीनन्दनः ॥"
इति सप्तमीवेधे जन्मश्रवणकल्पभेदादविरुद्धम् ॥
नवम्यादियोगस्य प्रशंसा यथा । ब्रह्मवैवर्त्ते ।
"उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।
भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।
अपि वर्षशतेनापि लभ्यते वा न वा विभो ! ॥"
पद्मपुराणे ।
"प्रेतयोनिगतानान्तु प्रेतत्वं नाशितन्तु तैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥"
उपवासादिफलं यथा, भविष्यपुराणे ।
"एकेनैवोपवासेन कृतेन कुरुनन्दन ! ।
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ॥"
ब्रह्मवैवर्त्ते ।
"मन्वादिदिवसे प्राप्ते यत् फलं स्नानपूजनैः ।
फलं भाद्रपदेऽष्टम्यां भवेत् कोटिगुणं द्विज ! ॥
तस्यान्तिथौ वारिमात्रं पितॄणां यः प्रयच्छति ।
गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः ॥"
उपवासाकरणे दोषो यथा, भविष्योत्तरे ।
"श्रावणेऽबहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु स भवेत् क्रूरराक्षसः ॥
वर्षे वर्षे च या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महाक्रूरा व्याली भवति कानने ॥"
स्कान्दे ।
"न करोति यदा विष्णोर्ज्जयन्तीसंज्ञकं व्रतम् ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥"
भविष्ये ।
"तुष्टार्थं देवकीसूनोर्ज्जयन्तीसंज्ञकं व्रतम् ।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह ॥
अकुर्व्वन् नरकं याति यावदिन्द्राश्चतुर्द्दश ॥"
तत्रोपवासक्रमः, भविष्यपुराणे ।
"पार्थ ! तद्दिवसे प्राप्ते दन्तधावनपूर्व्वकम् ।
उपवासस्य नियमं गृह्णीयाद्भक्तिभावतः ॥
वासुदेवं समुद्दिश्य सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्च्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्द ! त्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
गृहमुपक्रम्य ।
"तन्मध्ये प्रतिमा स्थाप्या काञ्चनादिविनिर्म्मिता ।
प्रतप्तकाञ्चनाभा सा देवकी सुतपस्विनी ॥
माचर्ष्यपि बालकं सुप्तं पश्यन्ती नीरदच्छविम् ।
वमटंकोऽपि तत्रैव खड्गचर्म्मधरः स्थितः ॥

यशोदा चापि तत्रैव प्रसूतवरकन्यका ।
बलभद्रस्तथा नन्दो दक्षो गर्गश्चतुर्मुखः ॥
एवं संपूजयेद्भक्त्या गन्धपुष्पाक्षतैः फलैः ।
स्थण्डिले स्थापयेद्देवीं सचन्द्रां रोहिणीन्तथा ॥
देवकीं वसुदेवञ्च यशोदां नन्दमेव च ।
चण्डिकां बलदेवञ्च पूज्य पापैः प्रमुच्यते ॥
अर्द्धरात्रे वसोर्धारां पातयेद्गुड़सर्पिषा ।
ततो वर्द्धापनं षष्ठीं नामादेः करणं मम ॥
कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमीदिने ।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः ॥
ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
सुवर्णं काञ्चनं गाश्च वासांसि कुसुमानि च ॥
यद्यदिष्टतमं लोके कृष्णो मे प्रीयतामिति ।
यं देवं देवकी देवी वसुदेवादजीजनत् ॥
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ।
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ॥
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्ज्जयेत् ॥
एवं यः कुरुते देव्या देवक्याः सुमहोत्सवम् ।
वर्षे वर्षे भगवतो मद्भक्त्या धर्म्मनन्दन ! ।
नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् ॥
पुत्त्रसन्तानमारोग्यधनधान्यर्द्धिमद्गृहम् ।
सम्पर्केणापि यः कुर्य्यात् कश्चिज्जन्माष्टमीव्रतम् ॥
विष्णुलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥"
पूजा च मध्यरात्रे गारुड़े ।
"कृष्णाष्टम्यान्तु रोहिण्यामर्द्धरात्रेऽर्च्चनं हरेः ॥"
व्रतपारणयोः कालनियमः । एकदिने जयन्तीलाभे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यलाभे तु रोहिणीयुक्ताष्टम्याम् । उभयदिने रोहिणीयुताष्टमीलाभे परदिने तदलाभे तु निशीथसम्बन्धिन्यामष्टम्यां उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिने इति । उपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम् । यदा महानिशायाः पूर्व्वमेकतरस्यावसानमन्यतरस्य महानिशायां तदनन्तरं वा तदैकतरावसाने पारणं यदा महानिशायामुभयस्थितिस्तदा उत्सवान्ते पारणम् ।" इति तिथ्यादितत्त्वम् ॥ * ॥

हरिभक्तिविलासमते तूपवासकालो यथा,—
"जन्माष्टमी पूर्व्वविद्धा न कर्त्तव्या कदाचन ।
पलवेधे तु विप्रेन्द्र ! सप्तम्यां चाष्टमीं त्यजेत् ॥
सुराया बिन्दुना स्पृष्टं गङ्गाम्भःकलसं यथा ।
विना ऋक्षेण कर्त्तव्या नवमीसंयुताष्टमी ॥
सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी ।
तस्मात् सर्व्वप्रयत्नेन त्याज्यमेवाशुभं बुधैः ॥
वेधे पुण्यक्षयं याति तमः सूर्य्योदये यथा ।
यच्च वह्निपुराणादौ प्रोक्तं विद्धाष्टमीव्रतम् ।
अवैष्णवपरं तच्च कृतं वा देवमायया ॥"
पारणकालो यथा,—
"यद्वा तिथ्यृक्षयोरेव द्वयोरन्ते तु पारणम् ।
समर्थानामशक्तानां द्वयोरेकवियोगतः ॥
केचिच्च भगवज्जन्ममहोत्सवदिने शुभे ।
भक्त्योत्सवान्ते कुर्व्वन्ति वैष्णवा व्रतपारणम् ॥"

तद्व्रतकथा यथा,—
"एकदा श्रीकुलाचार्य्यं वशिष्ठमृषिसत्तमम् ।
राजा दिलीपः पप्रच्छ विनयावनतः सुधीः ॥
दिलीप उवाच ।
भाद्रे मास्यसिते पक्षे यस्यां जातो जनार्द्दनः ।
तत्कथां श्रोतुमिच्छामि कथयस्व महामुने ! ॥
कथं वा भगवान् जातः शङ्खचक्रगदाधरः ।
देवकीजठरे विष्णुः किं कर्त्तुं केन हेतुना ॥
वशिष्ठ उवाच ।
शृणु राजन् ! प्रवक्ष्यामि यस्माज्जातो जनार्द्दनः ।
पृथिव्यां त्रिदिवं त्यक्त्वा भवते कथयाम्यहम् ॥
पुरा वसुन्धरा ह्यासीत् कंसाराधनतत्परा ।
स्वाधिकारप्रमत्तेन कंसदूतेन ताड़िता ॥
क्रन्दन्ती लज्जिता सापि ययौ घूर्णितलोचना ।
यत्र तिष्ठति देवेश उमाकान्तो वृषध्वजः ॥
कंसेन ताड़िता नाथ ! इति तस्मै निवेदितम् ।
वाष्पधारां प्रवर्षन्तीं विवर्णामपमानिताम् ॥
क्रन्दन्तीं तां समालोक्य कोपेन स्फुरिताधरः ।
उमया सहितः सर्व्वैर्द्देववृन्दैरनुद्रुतः ॥
आजगाम महादेवो विधातुर्भवनं रुषा ।
गत्वा चोवाच ब्रह्माणं कंसध्वंसनिमित्तकम् ॥
उपायः सृज्यतां ब्रह्मन् ! भवता विष्णुना सह ।
ऐश्वरं तद्वचः श्रुत्वा गन्तुं प्र ामदात्मभूः ॥
क्षीरोदे यत्र वैकुण्ठः सुप्तः स भुजगोपरि ।
हंसपृष्ठे समारुह्य हरेरन्तिकमाययौ ॥
तत्र गत्वा हरिं ध्यात्वा देववृन्दैर्हरादिभिः ।
तुष्टाव भगवान् वाग्भिरर्थ्याभिर्व्वाग्विदाम्वरः ॥
नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त ! नमोऽस्तु ते ॥
नमः कमलकिञ्जल्कपीतनिर्म्मलवाससे ।
नमः समस्तदेवानामधिपाय महात्मने ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
इति तेभ्यः स्तुतीः श्रुत्वा प्रत्युवाच जनार्द्दनः ।
देवा नम्रमुखाः सर्व्वे भवतामागमः कथम् ॥
ब्रह्मोवाच ।
शृणु देव ! जगन्नाथ ! यस्मादस्माकमागमः ।
कथयामि सुरश्रेष्ठ ! तदहं लोकतारण ! ॥
शूलिदत्तवरोन्मत्तः कंसराजो दुरासदः :
वसुधा ताड़िता तेन पदाघातेन सुष्ठिना ॥
वरं दत्त्वा पुराशम्भो मायया स प्रवञ्चितः ।
भागिनेयं विना राजन् ! शास्ता न भविता तव ॥
तस्माद्गच्छ स्वयं देव ! हन्तुं कंसं दुरासदम् ।
देवकीजठरे जन्म लभ गत्वा च गोकुलम् ॥
ब्रह्मणा प्रेषितो विष्णुः प्रत्युवाच पशोः पतिम् ।
पार्व्वतीं देहि देवेश ! अव्दं स्थित्वागमिष्यति ॥
उमया रमया सार्द्धं शङ्खचक्रगदाधरः ।
उद्दिश्य मथुरां चक्रे प्रयाणं कंसनाशनम् ॥
देवकीजठरे जन्म लेभे विष्णुर्गदाधरः ।
यशोदाकुक्षिमध्ये तु सर्व्वाणी मृगलोचना ॥
नव मासांश्च विश्राम्य कुक्षौ नवदिनाधिकान् ।
भाद्रे मास्यसिते पक्षे अष्टमीसंज्ञया तिथौ ॥